(1)

हेरवासोहनोविराट् महासुखोमहानागो मण्ड
लीकुण्डलीनटः असपत्नः पन्नकरः पन्नहस्त
श्च माटवः तालसम्मालकलः वृत्तश्च कम्पि
तः कल्पाकल्पनाहारी महाकेतुः कण्ठो
रकः अनलः पवनः पाठः पीठस्थः पीठरू
पकः पाटीनः कुलिशीपीनो मेरुधामा महा
महागुणी महातूणीरसंयुक्तोदेवदानवदर्प
हा अथर्वशेषः सौम्यासोदत्तहस्तासितेक्ष
णः यजुःसाममुखोतेसायजुर्वेदविचक्षणः
याज्ञिकोयज्ञरूपश्चयज्ञज्ञोधरणीपतिःजं
गमीभंगदोभावादक्षोभिगंसुदर्शनः अगम्य
सुगमः खर्वः खेटीखेटाननोनयः अमोघा
ऊमिन्धुपतिः सैन्धवः सानुमध्यगः
प्रतापीप्रजपीप्रातः मध्याह्नेसायमध्य
मः त्रिकालज्ञः सुगणकः पुष्करस्थः प
रोपकृत् उपकर्त्तापकर्ताच घृणीरणे
जयप्रदः धर्मोदर्मीश्वरः शारारूप ।।

दे-र. आऊविभूषण: वकुअर: कालवशीवशी
११५ वशिर्वशोवश: वशोवश्यकरोभस्मशापी
भस्मविलेपन: भस्मांगी मलिनांगअमा
लामण्डितमूर्धज: गणकाय: कुलाचा
र:सर्वाचार: सरवासम: मकारोगोत्रभिद्धे
प्राभीसरूपोभयानक: अरुण: चैकचिन्ह
असि: शोणा: कुकधारिणः अश्वमीवालणो
वज्रीक्षत्रिय: कार्यहेतुक: वैश्य: अक्रद्र:क
पोतस्यतष्ठातुष्ठोरुषाकुल: रोगीरोगपह:
अूर: कपिलाकपिनायक: पिनाकीचषमू
तिअक्षितिमांवृतिमांस्तथा जलमूर्तिर्वायुमू
र्तिः हुताश: सोममूर्तिमान् सूर्यो देवोयमा
न:आकाश: परमेश्वर: भवर्यानवमूर्तिअ
भूतात्माभूतभावन: भव: शर्वस्तथारुद्र:
पशुनाथअशंकर: गिरिजोगिरिजानाथो
गिरीन्द्रअमहेश्वर: गिरिश: खण्डहस्त।
अमहानुग्रोगणेश्वर: भीमईशानोभीति

११५

ड्यः खण्डपश्च एडविक्रमः खण्डभ्न्तरखण्डपर
शुः कृत्तिवासो विशापहः कंकालः कालनाका
रः श्रीकण्ठो नीललोहितः गणेश्वरो गणीनन्दी
धर्मराजेऽदरान्तकः भृङ्गिरीटीरसासारोदया
लूरूपमण्डितः प्रमतः कालरूद्रश्च कालाग्निः
शशिशेखरः त्रिपुरान्तकईशानस्त्रिनेत्रः
पंचवक्त्रकः कालहत्केवलात्माचरूजुस्सा
मवेदवान् ईशानः सर्वभूतानांईशानः सर्व
रक्षसाम् ब्रह्माधिपतिः ब्रह्मपतिः ब्रह्म
णोधिपतिस्तथा ब्राह्माशिवः सदानन्दी
सदानन्दः सदाशिवः मे ऽस्तुरूपश्चार्वः
गोगायत्रीरूपधारणः अघोरेभ्योघघोरघो
रतरेभ्यश्च सर्वतः शर्वसर्वेभ्योनमस्तेरूरू
पेभ्यः वामदेवस्तथाजेष्ठः श्रेष्ठः कालःक
रालकः महाकलोभैरवेशोवेशीकालविकार
णः वलविकरणोवालोवलप्रमथनस्तथा
सर्वभूतादिदमनोदेवदेवोमनोंमनः सद्यो

घोरे
भ्यो × ६
५ × ५

न

दे.र.
११६

जातंप्रपद्यामिसद्योजातायवैनमः भवेभवेना
तिभवेभजस्वमांभवोद्भवः मावनोनवनोमा
योवलकारीपरंपदं परःशिवः परोध्येयः
परंज्ञानेपरात्परः पारावारः परःशीच
मांसाशीवैसम्वोनमः ॐ ॐ श्री स्लौः देवोॐ
ह्रींह्रौं एरवोनमः ॐ ह्रौं नमः स्ववायेति
व मन्त्रोवदुरायुधः ॐ ह्रीं सदाशिवः ॐ ह्रीं
प्रापदुद्धारणोमतः ॐ ह्रींमहाकरालास्यो
ॐ ह्रींवटुकभैरवः भगवांस्त्र्यम्बको ॐ ह्रीं
ॐ ह्रींचन्द्रार्धशेखरः ॐ ह्रींमंजविलोधू
म्रो ॐ ह्रींत्रिपुरघातकः ह्रां ह्रीं ह्रीं दरिवंसो
गो ॐ ह्रीं हुं ह्रीं त्रिलोचनः ॐ वेदरूपोवेद
ज्ञोऋग्यजुःसामरूपवान् रुद्रोघोरोवा
घोरो ॐ ह्रंग्रघोरकः ॐ जुंसः पीयूषासहो
मृताध्यक्षोमृतालसः ॐ त्र्यम्बकंयजामहे
सुगन्धिंपुष्टिवर्धनम् उर्वारुकमिव बन्धना
न्मृत्योर्मुक्षीयमामृतात् ॐ हांजुंसः ॐ मृ

भैरवि: स्व: ॐजूंस: मृत्युंजय: १ ··· इदंनाम्नांस
हस्रंतुरहस्यंपरमेपरम् सर्वस्वंनाकिनांदेविजं
न्तूनांहितकाम्यया तवभक्त्यामयाख्यातंत्रिषुलो
केषुदुर्लभम् गोप्यंसहस्रनामेदंसाक्षादमृतरू
पिणम् य: पठेत्पाठयेद्वापिश्रावयेच्छृणुयात्त
था मृत्युंजयस्यदेवस्यफलंतस्यशिवेशृणु लक्ष्मी
कृष्णोधियाजीवोप्रतापेनदिवाकर: तेजसावह्नि
देवस्तुकवित्वेचैवभार्गव: शौर्येणहरिसंकाशोनी
त्यद्बृहस्पतिसन्निभ: ईश्वरत्वेनदेवेशिमत्समः कि।
मत: परम् य: पठेदर्धरात्रेचसाधकोधीत्र।
संयुत: पठेत्सहस्रनामेदंसिद्धिमाप्नोतिसाध
क: चतुष्पथेदेवलिंगेमेरुदेशेवनेजने श्मशा
नेप्रान्तरेदुर्गेपठनात्सिद्धिर्नसंशय: नौकायांचौ
रसंगेचसंकटेप्राणसंक्षये यत्रयत्रभयप्राप्ति
र्विषवह्निभयादिषु पठेत्सहस्रनामाख्यमुच्यतेना
त्रसंशय: भौमावास्यांनिशीथेचगत्वाप्रेतालयं
सुधी: पठित्वाभवेद्देविसाक्षादिन्द्रोर्चित: सु
रै: शनौदर्शदिनेदेविनिशायांसरितस्तटेपठे

दे॰र॰
११८

न्नामसहस्रं वैजपेदष्टोत्तरं शतम् सोदर्शनो भवेदा
मृत्युंजयप्रसादतः दिगम्बरो मुक्तकेशः साध
कोदशधापठेत् इहलोके भवेद्राजा परे मुक्तिर्भवि
ष्यति इदं रहस्यं परमं भक्त्या तव मयोदितम् म
न्त्रगर्भं मनुमयं नचाख्येयं दुरात्मने नोदद्यात्पर
शिष्येभ्यः पुत्रेभ्योपिविशेषतः रहस्यं ममसर्व
स्वं गोप्यं गुप्ततरं कलौ पंडितस्यापि नो ऋघ्यं गो
पनीयं तथात्मनः दुर्जना द्रक्षणीयं च पावनी
यमहन्निशम् श्रोतव्यं साधकमुखा द्रक्षणी
यं स्वपुत्रवत् इतिश्री देवी रहस्ये तन्त्रे मृत्यु
जयसहस्रनामसम्पूर्णम् श्रीभैरवः देवि
वक्ष्यामि ते स्तोत्रं सर्वसिद्धिप्रदायकम् मूलम
न्त्रैकसर्वस्वं रक्षणीयं प्रयत्नतः दीक्षा कालेच
पूजायां जपान्ते यः पठेछिवे विसर्जने तथा
ध्याने मदीक्षा फलमाप्नुयात् अस्य श्री स्तोत्र
राजस्य ऋषिर्भैरव ईश्वरि गायत्री छन्दइ मृ
त्युं महामृत्युंजयः शिवे हं बीजं कीलकमित्युक्तं
स्र्यों दिग्वन्धनं तथा भोगापवर्गसिद्ध्यैतु वि

नियोगः प्रकीर्त्तितः अथ ध्यानं चन्द्रार्काग्निविलो
चनं स्मितमुखं पद्मद्वयान्तःस्थितं मुद्रापाशमृ
गाक्षसूत्रविलसत्पाणिं हिमांशुप्रभम् कोटीच
न्द्रगलत्सुधाप्लुततनुं हारादिभूषोज्ज्वलं कान्त्या
विश्वविमोहनं पशुपतिं मृत्युंजयं भावये १ पीयू।
षांशुः सुधामणिः करतले पीयूषकुम्भं व
हन्पीयूषद्युतिसंप्रपन्नरगतः पीयूषधाराध
रः मां पीयूषमयूषसुन्दरवपुः पीयूषल
क्ष्मीकरणपीयूषद्रववर्षणोरहरहः प्रीणातु मृ
त्युंजयः २ देवं दिनेशाग्नि शशांकनेत्रं पीयूष
पात्रं कलशं दधानम् दोर्भ्यां सुधांशुद्युतिमि
न्दुचूडं नमामि मृत्युंजयमादिदेवम् ३ चन्द्रम
ण्डलमध्यस्थं रुद्रं वालेति विसने तत्रस्थं
चिन्तयेत्साध्यं मृत्युं प्राप्नोति जीयति ४ मा
त्राद्यं मातृकामौलिं वेदकल्पतरोः फलम् यो
जपेत्सम्भवेद्विश्ववैभवास्पदमीश्वरः ५ कूर्च
वीजं कलाचारविचारकुशलः शिवः यो।

दे॰ र॰
११८

जपेत्तस्य वक्त्राज्जनरीमज्जिहिमामारती ६ देवीशाकाशबीजन्ते बिन्दुबिम्बेंदुमण्डितम् चिन्तयेद्योविभोचित्तेस शवाद्ध्यतोभवेत् ७ सविसर्गभन्तेभर्गसर्गप्रलयकारकम् निसर्गतोभजेद्योन्तःलीयतेतेसमत्वदे ८ लक्ष्मीशब्दान्तरेविन्दुभूषणंजपेत्तुयः करेलक्ष्मीर्ह्रस्वैवाणी तस्य शम्भोरपोजयः ९ पातालेतियुगंदेवंद्योजपेद्वीरसन्निधौ ससार्वभौमंसम्राजंभजे दन्तेसलोकतां ११ शरदेवरदांवीरसाधनीसविसर्गकामजपेद्यःशरदाम्भोदधवलंतद्यशोत्रमेत् १३ प्राकाशबीजंसाकाशंजपेद्यः कुशासंस्तरे सकौलिकशिरोरत्नरंजितांघ्रियुगोभवेत् १४ शंकबीजंसरेफस्कंवम्भोपम्भासनेजपेत् कंकालमालाभरणोभविताभैरवोपसः हद्बीजंचजगद्बीजं तेजोरूपंचयोजपेत् तस्मैदास्यसिभोः शम्भोर्निजंधामसनातनम् १५ प्रकारंसाकारंगिरिशतवमन्त्रांचालगतंजपेद्यो स्यत्य

क

यो निरूपमपरानन्दमुदितः ससाम्राज्यं भूमौ भजति रजनीनायककलालसन्मौलिप्रान्ते व्रजति शिवसायुज्यपदवीम् १६ विभूषणत्रिकोणरसार भारणास्फुरन्दजारत्रिवृत्तम् भूगृहा रमि ति चक्रमण्डले तां निषण्णां भजामि समग्रहम् १७ नानाविधानर्घ्यविभूषणाढ्यां निःशेषपीयूषमयूखबिम्बे निषण्णामीशानमशेषशेषवाणीतनुं भगवतीं नमामि १८ इति स्तोत्रं दिव्यं सकलमनुराजैकनिकषं पठेद्यः पूजान्ते शिवगृहे वार्चनविधौ रसोजिताञ्वैरीन् भजतिनृपलक्ष्मीस्वमहसा भवेदन्ते वीरः सकलसुरसेव्यः शिवमयः १९ इतीदं परमं महामन्त्रं जयप्रियं पठेद्यः पाठयेन्नित्यं सर्वसंदेवदुर्लभं २० प्रदेयं परमं तत्वं महापातकनाशनं महामन्त्रमयं विद्यासाधनैकरसायनम् २१ त्रैलोक्यसारभूतं च त्रैलोक्याभयदायकं पठेन्नि शी

नः

ग्रन्थ

दे-र.
११९

येमन्त्रीतुसद्य: सिद्धिर्नवेत्कलौ चतुष्पथे र्धरा
त्रेतुत्रालेवापिमुहूर्तके पठितांकौलिकोदेवि
भवेद्भैरवसन्निभ: इतीदं मम सर्वस्वं रहस्यं
परमाद्भुतम् गोप्यकस्य नद्र ष्टव्यमित्याज्ञा
पारमेश्वरी इतिश्रीरुद्रयामलेतन्त्रे देवीरह
स्ये मृत्युंजयपंचांगसम्पूर्णम् ॐ रामचंद्रा
यनम: शुभमस्तु सर्वजगतम् ॥ संवत १९
४० आषाढ कृष्ण अमायांबुधे लिखीकेशो
रामप्रभाकर लवपुरे ॥८॥ राम राम राम ॥